International Journal of Sanskrit Research 2021; 7(6): 25-29

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2021; 7(6): 25-29
© 2021 IJSR
www.anantaajournal.com
Received: 10-09-2021
Accepted: 16-10-2021

विश्वजित् वर्मन
शोधच्छात्र,
राष्ट्रियसंस्कृतविश्वविद्यालयः
तिरुपति, आन्ध्रप्रदेश, भारत

**Corresponding Author:**
विश्वजित् वर्मन
शोधच्छात्र,
राष्ट्रियसंस्कृतविश्वविद्यालयः
तिरुपति, आन्ध्रप्रदेश, भारत

# पण्डिताक्षमारावमहोदयायाः कथामुक्तावल्याः लघुकथानां नामौचित्यम्

विश्वजित् वर्मन

**प्रस्तावना**

काव्यकथाः कल्पनाप्रसूताः, सामाजात्मिकाः आत्मकथाधारिताः, भ्रमणवृत्तान्ताधारिताश्च भवन्ति। तेषां नामानि नायकस्य नायिकायाः वर्ण्यविषयस्य च आधारेण भवन्ति। यथा रघुवंशम्, कुमारसम्भवम्, अभिज्ञानशाकुन्तलम्, कादम्बरी आदि। कदाचित् वृत्तसूचकानि अन्यपदान्यपि नामकरणे आधाराः भवन्ति। यथा मृच्छकटिकं चारुदत्तवृत्तान्तं सूचयति, मुद्राराक्षसं चाणक्यकौशलं दर्शयति। एवं रोचकतासम्पादनेन कवयः पाठकान् आकर्षन्ति।

तदनुसारं कथामुक्तावलीगद्यकाव्ये कवयित्री क्षमादेवी भिन्नभिन्नपदानामाधारेण कथानां नामकरं कृतवती। प्रेमरसोद्रेकः, परित्यक्ता, मिथ्याग्रहणम्, हैमसमाधिः, मायाजालम्, स्वाप्निकव्यामोहः, विधवोद्वाहसङ्कटम्, क्षणिकविभ्रमः, निशीथबलिः, मत्सजीवी केवलम्, आत्मनिर्वासनञ्च कथावस्त्वाधारितानि शीर्षकानि। तापसस्य पारितोषिके कृपाणिकां, वृत्तशंसिच्छत्रे छत्रं, नजमदिलेले तन्नामकं रत्नं, शरद्दले च वनीपकायाः शरद्दलमिव तिरोधानदृश्यम् आधारिकृत्य नामकरणं कृतवती। एवं कृतवती कवयित्री कथामुक्तावल्याः कथानां नामकरणे किमपि रहस्यस्य वपनं कृत्वा पाठकानां मानसेषु कौतुहलं जनयति। घटनायाः विस्तारः अपि उत्तरोत्तरकौतुहलवर्धनेन साकं कथायाः अन्ते नितान्तहृदयस्पर्षं रहस्यं समुद्घाटयति येन पाठकाः काव्यास्यास्वादनेन विचित्रमेवानन्दमनुभविष्यन्ति। अतः तासां पञ्चदशसंख्यकानां लघुकथानां नामौचित्यम् एकैकमत्र दर्शयिष्यते।

कथामुक्तावल्याः प्रथमा कथा प्रेमरसोद्रेकः। प्रेम नाम प्रियता, हार्दम् इत्यर्थः।[1] प्रेमैव नायिकानायकयोर्मध्ये भवति चेत् रतिः, मित्रयोर्भवति चेत् स्नेहः, गुरुषु

---

[1] प्रेमा ना प्रियता हार्दं प्रेमस्नेहोऽथ दोहदम् – अमरकोषः– १.७.४६२

भक्तिः, अनुयायीशिष्यादिषु वात्सल्यम्, वस्तुषु आबन्धः, पशुपक्ष्वादिषु अनुचितेषु आलम्बनेषु एकत्रस्थितायाः रत्याभासः भवति।[2] अस्यां कथायां गुग्लुहामिदयोः प्रेम्नः परिणामः अस्मा। तथापि अज्ञानतावशात् हामिदायाः निष्काषणम्। कृषीवलयोः हामिदायाम् अपत्यप्रेम। अस्मायाः वृद्धकृषीवलयोः अनुरागः। जीर्णयोः अस्मायां स्नेहभावः। अस्मायाः मेषशावके रत्याभासः। एवमत्र सर्वत्रापि प्रेम एव रसरूपतां याति। अतएव प्रेमरसः इति कथायाः नाम निर्दिष्टः। अन्ते पथिकस्य गुग्लुनामकस्य अस्मायाम् अनुरागः तन्निराकरणे हामिदायां निष्काषितायां पुनः प्रेमस्योद्रेकः भवति। तस्य उद्रेकः प्रेमरसोद्रेकः इति नाम निर्दिष्टः।

अस्यां कथायां प्रेमरसः भिन्नभिन्नोपाधिभिः संलक्ष्यते। यथा वृद्धयोः अस्मा–हामिदा आलम्बकः वात्सल्यभावः। अस्मायाः तीर्यजन्तौ मेषे रत्याभासः। अस्मायाः गुरुजनेषु भक्तिभावः। क्षेत्रवटौ वात्सल्यभावः। गुग्लौ अज्ञातायां हामिदायां प्रेमाभासः। तदनु तस्यैव वात्सल्यतायाः परिणतिः च प्रेमरसस्योद्रेकं जनयन्तीति नाम अन्वर्थः भवति।

पुनश्च गुग्लुः आस्मां नेतुमिच्छति तदा सा धनमोहं त्यक्त्वा निर्धनस्य कृषीबलस्य पार्श्वे एव स्थातुमिच्छति। तस्याः इयम् इच्छा प्रेम्नः अत्यन्तम् उद्रेकं जनयतीति इदं नामकरणं समुचितं भवति।

कथामुक्तावल्याः द्वितीया कथा तापसस्य पारितोषिकम्। ऊर्मिलायै कश्चन तापसः पारितोषिकरूपेण एकां कृपाणिकां दत्तवान्। तदेव तस्याः सौभाग्यातिशयस्य कारणम्। मरणासन्नं पतिं दृष्ट्वा ऊर्मिलायाः तया कृपाणिकया मरणप्रचेष्टा परं तत्स्पर्शनेन तापसस्याविर्भावः मरणात् निवारणञ्च। सर्वमपि तापसस्य पारितोषिकरूपेण प्रदत्तया कृपाणिकया एव साध्यते। तदेव सूचयति शीर्षकम्। अतः इदं शीर्षकं कथायाः संग्रहरूपेण कारणं भवतीति अवगम्यते।

कथामुक्तावल्याः तृतीया कथा परित्यक्ता। अस्याः कथायाः नामकरणं किञ्चित् विलक्षणो भवति। परित्यक्ता धनिकस्य वधूरित्यपि वक्तुं न शक्यते। यतो हि सा एव स्वयं गता। किन्तु सा विशुद्धा सर्वदा पातिव्रत्यं रक्षति। धनिकेन कदापि न परित्यक्ता। सन्यासीबन्धनात् विमुच्य रक्षकभटपरिवारस्य आश्रयं नयति। तदाश्रयमपि सा स्वयमेव परित्यजति। तदनन्तरं स्वषकं कृषिबलगृहमपि परित्यजति। अन्ते काषायवस्त्रधारिणीति धर्मशालाकर्मचारिणा बहिः निष्कासिता।

सम्पूर्णतया इतिवृत्तमस्याः परित्यागचित्रणे एव गच्छति। श्रवणमात्रेण सर्वेषां भ्रमो जायते इयं भर्त्रा परित्यक्ता वा इति। तत् कथ्यस्य संग्रहार्थम् इदं नामकरणं कृत्वा अस्याः बन्धत्वकाणेन परित्यक्ता वा उतो परगृहवासापवादेन इयं परित्यक्ता वा इति अंशद्वयं निरूपयितुम् इदं नामकरणं कृतं सार्थकञ्च। मुख्यभूमिकायां नायिकायां दोषद्वयमस्ति एकस्तु बन्धत्वदोषः अपरश्च कपटयोगीगृहावासः इति। आभ्यां दोषाभ्यां इयं परित्यक्ता इति मुख्यकथांशभूतः अयं प्रसङ्ग अनेन नाम्ना सूच्यते।

कथामुक्तावल्याः चतुर्थी कथा मिथ्याग्रहणम्। अस्यां कथायां प्रधानभूमिकायाम् आमीना सरला च। उभौ सखायौ विश्वासनीयौ अपि मिथ्यां गृहीत्वा एकः अपरस्योपरि क्रोधम्, ईर्ष्याम्, असूयां च प्रदर्शयति। आबाल्यमित्रमपि मिथ्याश्रयेन परस्परसम्भाषणे विरतौ भवतः। कथायाः पूर्वांशस्य अध्ययनेन प्रायः सर्वे अपि पाठकाः मिथ्यायाः ग्रहणं करोति यत् सरला एव खलनायिका या अमीनां वञ्चयतीति। कवयित्री अत्र गोपस्य गोपनं कृत्वा अन्ते रहस्यस्योद्घाटनं करोति यत् कथायाः खलनायिका काचिदन्या। इति साधारणमशं विषयत्वेन आश्रित्य अमीनासरलयोः वृत्तेः संस्थाप्य तद्बहिः प्रकाशयति। एवं मिथ्याश्रयेण कथायाः नामकरणं कृत्वा काव्यकथां साधयति कवयित्री।

कथामुक्तावल्याः पञ्चमी कथा वृत्तशंसिच्छत्रम्। यद्यपि इदं शीर्षकं कठिनाक्षरयुक्तं किन्तु कथायाः

[2] अनुभयनिष्ठायां बहुनायकविषयायानां–प्रतापरूद्रीये।

इतिवृत्तम् अनेन पदेन गम्यते। वृत्तशंसितीति वृत्तशंसितं छत्रं यस्यां कथायां तत् वृत्तशंसिच्छत्रम्। अस्यां कथायां नामाक्षरयुक्तं छत्रं दृष्ट्वा सामाजिकाः निश्चिन्ताः भवन्ति यत् अनुपमः मृतः इति। प्रायः विंशतिवर्षेभ्यः अनन्तरं पुनः नामाङ्कितं छत्रं दृष्ट्वा ईन्दीरा मीरा च निश्चिते भवत यत् अयं त्यागराजः एव अनुपमः। सः अधुनापि जीवति। एवं नामाङ्कितं छत्रमेव कथायाः अभिज्ञानम्। मृदुलपदैः शीर्षकं करोति चेत् तत् अत्यन्तं हृदयावर्जकं भवति। अतः विषयोचितं नामवक्रतानि च उपजीव्य कवयित्र्या स्वप्रतिभया अस्याः कथायाः नामकरणं कृतम्। शीर्षकपठनेन एव पाठकाः कथां ज्ञास्यन्तीति आशा प्रकटिता कवयित्री।

कथामुक्तावल्याः षष्ठी कथा हैमसमाधिः। हिमे समाधिः हैमसमाधिः। हिमे मृतकलेवरस्य यथातथमेव स्थितिर्भवतीति सर्वविदितम्। अम्बुजस्य पितुः कलेवरः बहुकालं यावत् हिमे समाधिः भूत्वा तिष्ठति। तदन्वेषणे प्रवृत्तानां सर्वासां घटनानाम् आधारः हिमे स्थितः मृतकलेवरः एव। अतः हैमसमाधि इति नामकरणं युक्तम्। अत्र शीर्षके समाधिशब्दः समाधानमित्यपि अर्थं बोधयति। समाधिर्नाम अष्टाङ्गयोगेषु सम्प्रज्ञातसमाधिः असम्प्रज्ञातसमाधिः इति रूढा समाधीयते। समाधिर्नाम समाधानमित्यर्थः स्वीक्रियते चेत् सम्पूर्णकथावृत्तस्य समस्यायाः समाधानमपि हिमस्थितः कलेवरः एव। अतः हैमसमाधिः इति शीर्षकम् अन्वर्थम्।

कथामुक्तावल्याः सप्तमी कथा मायाजालम्। अस्यां कथायां चतसृणां महिलानां इतिवृत्तं एकपुरुषसम्बद्धम् अस्ति। माया नाम इन्द्रजालः। अयं पुरुषः मायया सर्वा महिलाः प्रेमरूपेन्द्रजालेन आकृष्य प्रवञ्चयति। तस्य इयं कुचेष्टा उत्तरोत्तरं चतसृणां महिलाम् आकर्षणं मायायाः जालम् इति मायाजालं नामकरणं सार्थक्यं भवति। कथायाः स्त्रीपात्राणि मुग्धा, मन्दा, मोहिनी, दया च मायायाः एव नामान्तराणि भवन्ति। ताः सर्वाः अपि नामोचितस्वभावेन मायया तस्मिन् आकृष्टाः भवन्ति। एवमत्र विषयोपस्थापनदृष्ट्या पात्रचित्रणदृष्ट्या च कथायाः नामकरणं सार्थकं भवति।

कथामुक्तावल्याः अष्टमी कथा स्वाप्निकव्यामोहः। बुद्धेः चेतनादशायां सर्वमपि सर्वेषां प्रत्यक्षगोचरं भवति। परं स्वप्नावस्थायाम् अचेतनतादशायां येन स्वप्नः द्रष्टः तेनैव गम्यते। अतः रुग्णस्य स्वप्नदर्शनं तेनैव उक्तम्। अयं रुग्णः स्वप्नावस्थायां पथिकः भूत्वा बालुकामयराजस्थानप्रदेशं गत्वा एकम् अद्भूतमपि रमणीयं विषयम् अनुभवति। अतः स्वप्नावस्थायाम् अनुभूतविषयः स्वाप्निकव्यामोहः इति नामकरणं सार्थकं भवति। अत्र कवयित्री अद्भुतासु घटनासु सत्यासत्यनिर्णये समसामयिककाले पाठकानां मनसि विश्वासः भवतु इति वक्तुमिच्छति। अतः इयं घटना स्वप्नावस्थायां दर्शिता। स्वप्नावस्थायाः व्यमोहः स्वाप्निकव्यामोहः इति घटनानुरूपं नामकरणं कृतम्। अतः अन्वर्थो जातः स्वाप्निकव्यामोहः।

कथामुक्तावल्याः नवमी कथा नजमदिलेलः। नजमदिलेलः इति शब्दः यथा श्रवणे भ्रमं जनयति तथैव एतद्वृत्तमपि सामाजिकानां भ्रमं जनयति। अन्ते रूढीसम्प्रदायेषु विश्वासः कर्तव्यः वा न वेति सन्देहम् अपि प्रदर्शयति। नजमदिलेलः मणेः निर्वाचनं स्वयं कथयित्री एव कथयति – "श्रुतो भवद्भ्यां नजमदिलेलनाम्नो प्रथितकीर्तेर्नक्तनक्षत्रमित्यन्वर्थनाम्नोऽद्भूतहीरकस्य सौन्दर्यातिशयः [3] " इति। वस्तुतः काशीमस्य रत्नप्राप्त्याभिलाषः, तदभिलाषेन प्रचेष्टा, सर्वमपि नजमदिलेलरत्नमाधारीकृत्यैव भवति। अतः कथेयम् अन्वर्था भवति।

कथामुक्तावल्याः दशमी कथा विधवोद्वाहसङ्कटम्। विगत धवः यस्याः सा विधवा। उदिह्यते इति उद्वाहः, विधवायाः उद्वाहे ये सङ्कटाः आयान्ति ते विधवोद्वाहसङ्कटाः। तेषां सङ्कटानां वर्णनपरा इयं कथा विधवोद्वाहसङ्कटनाम्ना वर्णिता। अत्र विधवोद्वाहः इति द्वन्दसमासं स्वीकुर्मश्चेत् "द्वन्दान्ते

[3] कथामुक्तावली, नजमदिलेलः, पुटसख्या–१०१

श्रूयमाणः शब्दः प्रत्येकं सम्बद्ध्यते" इति न्यायेन अत्र विधवानां सङ्कटः, तासां विवाहे सङ्कटः इत्युभयोऽपि अर्थः अत्र आयाति। अस्यां कथायां पार्वतीनामायाः विधवायाः सङ्कटमयं दैन्यजीवनं तथा केनचित् पुरुषेण प्रणयाङ्कुरे जाते शास्त्रसम्मतविवाहसम्पन्ने अपि बहवः समस्याः दर्शिता कवयित्री। तस्मात् कारणात् विधवोद्वाहसङ्कटनाम अन्वर्थं भवति।

कथामुक्तावल्याः एकादशी कथा क्षणिकविभ्रमः। क्षणमात्रविभ्रमः एव क्षणिकविभ्रमः। मनुष्यस्य बुद्धिः कदा कदाचित् विभ्रान्तः भवति। यथा रामायणे रामस्य स्वर्णहरिणस्य अभावे अपि विभ्रमः वाल्मीकिना दर्शितः। तस्मात् सीताहरणात् रावणवधपर्यन्तं कथा नीता। एवमत्र हरिः स्वस्य युतकपरिवर्तनं कृत्वा मृतकलेवरे तद्युतकम् परिधारणं कारयित्वा युतकस्थितं धनं मृतकलेवरे स्थापयित्वा तद्घातकरुपेण परिचयं दत्वा पत्न्यै प्रेष्यते चेत् सन्तानसम्भवा सा सुखेन जीवतीति धीयः कारां गतः। तस्य अयमेव विभ्रमः। तदारभ्यः विंशतिवर्षाणि यावत् दम्पत्योः वियोगः। हरेः पत्न्याः सुनीत्याः विंशतिवर्षाणि यावत् दीनोचितं जीवनं सर्वमपि हरेः क्षणमात्रभ्रमकारणेन एव जातम्। अतः क्षणिकविभ्रमः नामकरणम् सार्थकं भवति।

कथामुक्तावल्याः द्वादशी कथा निशीथबलिः। निशीथे बलिः इति निशीथबलिः। अत्र निशीथः शब्दः रात्रीवाची भवति। बलिशब्दस्य बलिचन्दने लक्षणा। गोविन्दस्य कालिकायां परमाभक्तिः। तन्निमित्तं समये बलिः दीयते चेत् परिवारस्य समाजस्य ग्रामस्य देशस्य च सुखसम्वृद्धिः भवतीति भावना यथा सर्वेषु वर्तन्ते तथैव गोविन्दस्यापि। समुचिते समये नारीबलिदानं श्रेष्ठमिति गोविन्दस्य विश्वासः। नारीबलिदानेन अत्र अजायाः बलिः देयः इति तात्पर्यम्। किन्तु बलिदाने कृते अपि तन्मांसभक्षणे बलिष्ठस्य पुरुषस्य मेषस्यैव बलिः श्रेष्ठमित्यपि तस्य अभिप्रायः। दम्पत्योः उभयोः संवादः भवति। तत्संवादे झुलेखायाः विजिगित्सायाः तन्निश्चयरूपेण आत्मनः एव बलिदानं भवतीति चिन्तनम्। गोविन्दस्य भाषणे आत्मनः बलिदानस्य अपेक्षया पुरुषमृगसस्य बलिदाने पुनः उस्मानविषयिणी चिन्ता जागरिता। रात्रौ बलिदानविचारे कथायाः ग्रन्थिः। पुनः प्रभाते अजाविषये एव बलिदाने ज्ञाते कथानकमिदं अत्यन्तं गोप्यस्य गोपनेन मनः रञ्जयति इति निशीथबलिः शीर्षकं सर्वथा सार्थकम्।

कथामुक्तावल्याः त्रयोदशकथानकं मत्सजीवी केवलम्। अस्मिन् कथानके समाजे जनानां प्रकृतिः यथातथं चित्रितम्। जनाः प्रायः सज्जनान् स्वार्थचिन्तनया सम्मानयन्ति। तेषां विद्वत्सु अपि स्वकीयेषु अनादरः भवति। यद्यपि अस्मिन् समाजे विद्वान्, सज्जनः, तपस्वी वा भवतु तं प्रति कोऽपि गौरवं न दर्शयन्ति। परं दूरे विद्यमानं दुर्जनमपि महन्तं मनुते। इयमेव स्थितिः अस्यां कथायां वर्णिता। एकः मुनीन्द्रः गणुः नाम बाल्यावस्थायां पितुरन्वेषणाय समुद्रं गतः न प्रत्यागतः। सः केनचित् तापसेन पोषितः विद्वान् जातः। तद्विरहे माता विक्षिप्तमनष्का जाता। अधुना सः एव प्रवाचकत्वेन ग्रामम् आगतः इति ज्ञात्वा ग्रामीणाः विक्षिप्तमनष्कायाः पुत्रः मत्स्यजीवी अयं इति निश्चित्य वृथा अस्य पूजनसत्कारादिकं कल्पितं इति आक्रोशं दर्शयन्ति। अत्र यः गणुः आदौ अतिसम्माननीयं पात्रम् सैव परिचयानन्तरम् अवहेलनस्य विषयः। वस्तुतः एकः एव पुरुषः उपाधिभिः ज्ञायमानः दूषणभूषणपात्रम् अर्हतीति सूचनमेव अस्याः कथायाः नामकरणस्य मुख्यं लक्ष्यम्। मत्सजीवी केवलमिति नामकरणेन समाजे निम्नवर्गीयानां जनानां जीवनं कथं भवतीति प्रदर्शयितुमिच्छति कवयित्री क्षमादेवी।

कथामुक्तावल्याः चतुर्दशं कथानकम् अत्मनिर्वासनम्। इदं कथानकं सम्पूर्णतया करुणरसात्मकम्। व्याधिग्रस्तस्य कथानायकस्य अनुपस्य आत्मनिर्वासनमेव अत्र प्रधानं कथानकम्। लोके कुष्ठरोगग्रस्तः जनाः समाजाद्बहिष्कृताः भवन्ति। कस्मिन्नपि कार्ये तेषां सहभागः नेष्यते। अतः एते आत्मानं अत्यन्तं पातकिनं मत्वा समाजात् बहिरेव तिष्ठन्ति। गृहे अपि स्वयमेव विविक्ततया वासं करोति। तद्वदाचरति अस्याः कथायाः नायकः अनुपः।

सः स्वयं रोगविषयं गोपयित्वा पुत्रस्य जन्मदिने आगतया नर्तक्या सह पलायितः इति आत्मापवादं प्रचारं कृत्वा मातुंगाख्ये ग्रामे विद्यमानं कुष्टरोगचिकित्सालयं गत्वा स्वस्य निर्वासनं करोति। परिवारसदस्याः आत्मीयाः च तं दुश्चरित्रः इति चिन्तयन्ति। परं कथान्ते सर्वं गोप्यं प्रकाशितं भवति। अतः एतस्याः कथायाः आत्मनिर्वासनमिति नामकरणं नितरां समन्वितं भवति।

कथामुक्तावल्यां कथानां नामानि कथायाः इतिवृत्तमाधारीकृत्य सङ्गतानि सन्ति चतुर्दशकथासु। परम् अन्तिमायाः अस्याः कथायाः नामकरणं किञ्चिद्विलक्षणम्। इयं कथा शरत्कालसूचनया एव आरब्धा अतः शरद्दलमिति कृतमिति वक्तुं शक्यते। किन्तु तदपि पर्याप्तं नास्ति वनिपकायाः तिरोधानसमये वाक्यमनेन शरद्दलनामकरणं सार्थकमिति सूचयति क्षमादेवी। तद्यथा–... काञ्चनच्छायामिवाकृतिं तुहिनावृतायां रजन्याममन्दं प्रचलन्तीमङ्गुल्या निर्दिशन्नब्रविदहज्जुः त्रिभिस्तैरपसर्पन्त्यां वनीपकाया दीनदीनाऽकृतिर्निपुणं निरूपिता वात्यया सरभसं वाहिताऽपास्तं शरद्दलमिव भिदुरा क्रमेण यावत्तिरोहिताऽभूत्।[4]

अस्मिन् वाक्ये वाहिताऽपास्तं शरद्दलमिव इति उपमानेन तस्य तिरोधानमुपमितम्। शरद्दलमित्यस्य विग्रहवाक्यं द्रष्टव्यं दलशब्दस्य अर्थः पत्रमिति स्वीक्रियते। यथा कमलदलम्। शरच्छब्देन शरदि भवं कमलमिति लक्षणया स्वीक्रियते। यथा कमलपत्रं प्रवाहिते जले विलीनं भवति तथैव इयमपि अन्धकारे विलीना जाता इति अस्याः कथायाः अभिधा अन्वर्था।

एवं घटना पात्रमुपजीव्यञ्चाधारीकृत्य कथामुक्तावलीकाव्यस्य पञ्चदशकथाः अन्वर्थाः भवन्ति। सर्वासु कथासु इतिवृत्तं सामाजिकमेव एकैकया घटनया प्रकाश्यते। तस्याः तस्याः घटनायाः पूर्वपरसन्निवेशेन लक्षितघटना चित्ररूपेण हृदयपटले प्रस्फुटिताः भवन्ति। तस्याः घटनायाः विस्तारे समस्यानां प्रस्तुतीकरणे च पात्राणि कल्पितानि। पात्राणां मनोविचाराः कदाचित् सरलगद्येन कदाचित् दीर्घसमासेन वा संवादमाध्यमेन प्रस्तौति या पाठकहृदयम् आकर्षति। एवं प्रत्येकमपि कथा मुक्तायमाना अस्तीति कवयित्री प्रस्तौतुमिच्छति। अतः मुक्तावलीति नामकरणं कृतम्। यथा मुक्तावली कण्ठे धरति चेत् हृदयस्य सौन्दर्यं वर्धितं भवति तथैव एताः कथाः कण्ठे स्थापयित्वा अथवा पठित्वा अस्माकम् अन्तकरणस्य सौन्दर्यस्य वर्धनं भविष्यतीति बुद्धेः विकासश्च भविष्यतीति धिया कथामुक्तावलीति नामकरणं कृतम्। अतः तन्नामकरणं सार्थकं भवति।

## संदर्भ


1. कथामुक्तावली (१५ लघुकथानां संग्रहः), पण्डिता सौ॰ क्षमाराव, न.मा.त्रिपाठी लि., पुस्कविक्रेतारः प्रकाशकाश्च, प्रिन्सेस स्ट्रीट, मुम्बापुरी–२, १९५४।
2. संस्कृत – हिन्दी शब्द कोश, आप्टे, वामन शिवराम, मोतीलाल बनारसीदास, दिल्ली :
3. वाचस्पत्यम्, श्रीतारानाथतर्कवाचस्पति, राष्ट्रीय संस्कृत संस्थान, दिल्ली : २००६
4. अमरकोषः, सं. श्रीमन्नालाल ' अभिमन्यु ' मोतीलाल बनारसीदास, दिल्ली : २०१३
5. मञ्जुनाथग्रन्थावलिः, द्वितीयभागः, (निबन्धाः ललितनिबन्धाश्च), राधावल्लभत्रिपाठी, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली
6. विंशशताब्द्याः संस्कृतेः उपन्यासानां (प्रबन्धकथानां) सास्कृतिकं अनुशीलनम्। अनुसन्धाता– घनश्याम लाल गुप्त, मार्गदर्शकः– जी.एस.आर.कृष्णमूर्ति, केन्द्रीयसंस्कृतविद्यापीठम्, लखनऊ, १९९३.


[4] कथामुक्तावली, शरद्दलम्, पृष्टसंख्या–